International Journal of Jyotish Research: 2024; 9(1): 65-67

International Journal of Jyotish Research
(वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2024; 9(1): 65-67
© 2024 Jyotish
www.jyotishajournal.com
Received: 09-01-2024
Accepted: 11-02-2024

**सत्यव्रत वेहेरा**
शोधच्छात्र: (संस्कृत विभाग:),
महाराजा श्रीरामचन्द्र भञ्जदेओ
विश्वविद्यालय:, वारिपदा, मयूरभञ्ज,
ओडिशा, भारत

**Correspondence**
**सत्यव्रत वेहेरा**
शोधच्छात्र: (संस्कृत विभाग:),
महाराजा श्रीरामचन्द्र भञ्जदेओ
विश्वविद्यालय:, वारिपदा, मयूरभञ्ज,
ओडिशा, भारत

# वेदांगभूतं ज्योतिर्विज्ञानम्

**सत्यव्रत वेहेरा**

**DOI:** https://doi.org/10.22271/24564427.2024.v9.i1a.215

**सारांश**
वेदाङ्गभूतं ज्योतिषशास्त्रं जनानां भव्यभावनया व्यासवशिष्ठपराशरगर्गप्रभृतिभि: महर्षिभि: प्रणीतं विद्यते। यस्य महदुद्देश्यं भवति जीवनयात्रायां जातकस्य शुभाशुभफललाभ:। फलादेशनिमित्तमेव सम्वत्सरादिपञ्चाङ्गलेखनम्, स्पष्टग्रहसाधनम्, लग्नादि द्वादशभावानां गणितम्, लग्नादि सर्वेषां ग्रहाणां गृहम्-उच्च-होरा-द्रेष्काण-नवांशप्रभृतीनां ज्ञानमपरिहार्यम्। पुनश्चग्रहाणामुदयास्तवक्रमार्गादिगतिज्ञानं तथा दीप्तादि अवस्थावोधपुरस्सरं तनुधनसहजमातृविद्यापुत्रशत्रुजायामृत्युधर्मकर्मलाभव्ययादीनां फलादेश: प्राणिनां कृत्याकृत्यं विधीयते। जीवनस्य शुभाशुभनिर्णयनिमित्तं मौलिकतया संस्कार-संक्रान्ति-ग्रहगोचर-विवाह-यात्रा-गृहारम्भ-गृहप्रवेश-वाणिज्यप्रभृतिषु शुभमुहूर्त्तविचार: नितरां प्रयोजनम् ।

**कूटशब्द:** वेदांगम्, ज्योतिषम्, ग्रह:, योग:

## प्रस्तावना

### ज्योतिषशास्त्रस्य वैशिष्ट्यम्

ज्योतिषशास्त्रस्य विकाशक्रमप्रसंगे[१] लघुपाराशरीग्रन्थे ज्योतिषशास्त्रकर्त्तार अष्टादशमहर्षय: समाम्नाता: यथा-

> सूर्यो पितामहो व्यासो वशिष्ठोऽत्रि पराशर:।
> कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिरा।।
> लोमश: पौलिशश्चैव च्यवनो यवनो भृगु:।
> शौनकोऽष्टादशाश्चैते ज्योतिश्शास्त्रप्रवर्तका:।

ज्योतिषशास्त्रस्य विकास: पञ्चसु अवस्थासु विभज्यते यथा- प्राग्वैदिककाल:, वैदिकसंहिताकाल:, वेदाङ्गकाल:, सिद्धान्तकाल आधुनिककालश्चेति। वेदानामपौरुषेयत्वात् अनादिनिधनत्वं गृहीतत्वात् वैदिकसंहितासु ज्योतिषशास्त्रं विनिर्दिष्टत्वात् ऋग्वेदकालादारभ्य वेदाङ्गज्योतिषस्य विकास: दृश्यते। सामान्यतया ज्योतिषं तु सिद्धान्त- संहिता- होराभेदेन त्रिस्कन्धमुच्यते। तच्च [२]भारतज्योतिषशास्त्रेतिहासे एवं वर्णितम्। “पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिता केरली शकुनश्चेति ज्योतिश्शास्त्रमुदीरितम्”
मुहूर्तज्ञानं तिथिवारादिज्ञानञ्च ज्योतिषशास्त्रमन्तरा नैव जायते इति तस्मात् वेदाङ्गज्योतिषे प्रकटितम्। “प्रत्यक्षं ज्योतिषशास्त्रं चन्द्रार्कौ यत्रसाक्षिणौ”- वेदवेद्यं ज्योतिषशास्त्रमिदं वेदाङ्गत्वेन ग्रहस्थितिविषये पृथ्वीस्वरुपगतिविषये च मौलिकसिद्धान्तं प्रकटी करोति। एतदर्थं शास्त्रमिदं जगद्व्यवहारप्रवर्तकं सर्वलोकोपकारकं ग्रहादिगतिनिर्णायकं ज्योतिषशास्त्रं मानवस्य जीवनचर्यायां प्राथम्यमङ्गीक्रियते।

### जीवनचर्यायां ज्योतिषम्

समग्रब्रह्माण्डरूपविराट्पुरुषस्य व्यक्तस्वरूपं हि भचक्रमाहोस्वित् राशिचक्रमुच्यते। कालपुरुषस्याङ्गविभागा: मेषादिराशिक्रमेण विधीयन्ते। राशयस्तु नवचरणविशिष्टा: भवन्ति। नवचरणविशिष्ट मेषादिराशिषु मेषराशि:- मस्तकम्, वृषस्तु- मुखम्, मिथुनम्- वक्षस्थलं, कर्कटस्तु- हृदय:, सिंहराशि:- उदरम्, कन्याराशि:- कटिप्रदेश:, तुला तु नाभि:, वृश्चिकस्तु उपस्थम्, धनुराशि:- जघनम्, मकरराशि:- अङ्घ्रिद्वयम्, कुम्भराशि:- चरणदण्ड:, मीनराशिस्तु पादद्वयमिति। द्वादशराशिषु लग्नाधारेण द्वादशभावमाकलय्य सामान्यफलादेश: ब्रूयते। परन्तु ग्रहाणां विविधयोगमुपजीव्य स्वतन्त्रफलादेश: ज्योतिर्विद्भि: निर्दिश्यते।

[३]वृहत्संहितायामुक्तम्-

"ज्योति: शास्त्रमनेकभेदविषयं स्कन्धस्त्रयाधिष्ठितम्।
तत्कात्स्न्योंपनयस्य नाममुनिभि: संकीर्त्यते संहिता।।"

दैनन्दिनजीवनयात्रायामखिलं श्रौत-स्मार्त्त-कर्म-सम्पन्नाय जगद्धिताय सिद्धान्त-संहिता-होरारूपं स्कन्धस्त्रयाधिष्ठितं वेदस्य नेत्रस्वरूपं ज्योतिषशास्त्रं महर्षिभि: सूक्ष्मेक्षिकया बुद्ध्या अमितप्रतिभया महता यत्नेन प्रणीतम्।
सच्चिदानन्दपरम्ब्रह्मण: नि:श्वासभूतानां प्राणिनामाधिभौतिक- आध्यात्मिक-आधिदैविकदु:खानां नाशक: चतुर्वर्गप्रदायकस्तु अपौरुषेय: वेद:। इदानीन्तनसमये प्राचीनार्वाचीनेतिहासज्ञैरपि सर्वप्राचीनप्रमुखप्रामाणिक: सर्वोपलब्ध: शिखरायमाण: वेद: सर्वैरेव समाद्रीयते।
[४]तथा हि महर्षिर्मनुर्ब्रवीति-

"वेदोऽखिलधर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।"

तत्र वेदो हि यज्ञकर्मादीनां प्रवर्त्तकत्वेन सुप्रतिष्ठित:। यज्ञादिकर्मणां विधानं विशिष्टकालेनैव सम्पाद्यते। तस्मात् शुभाशुभफलस्य विचार: अपरिहार्यत्वात्तिथिवारनक्षत्रादीनां ज्ञानं शास्त्रत: नितरामवधातव्यम्, तच्च [८]तैत्तिरीयब्राह्मणे कथितम्:- वसन्तेब्राह्मण अग्निमादधीत। ग्रीष्मे राजन्य आदधीत। शरदि वैश्य आदधीत। एतेन निश्चीयते यत्- नक्षत्र-तिथि-पक्ष-मासर्तु-सम्वत्सरादिकालखण्डेन सह यज्ञयागव्रतोपवासानां विधानं वहुत्रोपलभ्यते। वेदस्मृतिपुराणादिशास्त्राणां विधिव्यवस्थानां यथार्थनिर्बहणाय ज्योतिषशास्त्रस्य ज्ञानमवश्यमुपादेयं लक्ष्यते। यज्ञादिसाधनार्थं वेदस्य षडङ्गेषु वेदपुरुषस्य चक्षुरुपं ज्योतिषशास्त्रं विद्यते इति।

**ग्रहाणां शुभाशुभनिर्णय**

जातपत्रिकाया: शुभाशुभफलनिर्देशे [५]लघुपाराशरीग्रन्थे वर्णितम्।

"सर्वे त्रिकोणनेतारो ग्रहा: शुभफलप्रदा:।
पतयस्त्रिषड़ायानां यदि पापफलप्रदा:।।"

अस्याशय: सर्वे त्रिकोणाधिपतय: ग्रहा: शुभफलानि प्रयच्छन्ति, परन्तु त्रिषडायाधिपतय: नाम ३-६-११ भावाधिपतय: भवेयुर्नाम पापग्रहा: उत शुभग्रहा:, परन्तु ते सर्वे अशुभफलं ददति। स्वाभाविकतया क्षीणचन्द्र:, सूर्य:, मङ्गल:, शनि एते पापग्रहा: भवन्ति। पूर्णचन्द्रमा, वुध:, वृहस्पति:, शुक्र: स्वाभाविकशुभग्रहा: भवन्ति। तत्र [६]पराशर: कथयति।

"केन्द्रत्रिकोणसम्वन्ध: सदा योगकर: स्मृत:।"

अर्थात् सर्वेषां जातके केन्द्राधिपतिस्तथा त्रिकोणाधिपतिरेकत्र स्यातां तर्हि तौ योगकारकौ भवत:, पुनश्च केन्द्राधिपतिरथवा त्रिकोणाधिपति ग्रह: केन्द्रे त्रिकोणे वा तिष्ठेत् तौ च योगकारकौ स्त:। एवञ्च राहुकेतु ग्रहद्वयं जातके भावाधिपतिग्रहानुसारं फलमर्पयति। अपि तु गजकेशरीयोगसम्वन्धे [७]वृहत्पाराशरे कथितम्।

"केन्द्रस्थिते देवगुरौ शशाङ्कात् योगस्तदाहुर्गजकेशरीति"।

चन्द्रमसश्चेत् प्रथम-चतुर्थ-सप्तम दशमभावेषु गुरुस्तिष्ठेत् तर्हि स गजकेशरीयोग उच्यते। गजकेशरी योगे जातक: तेजस्वी, धनी, मेधावी तथा राजकीय सहयोगलब्धा चतुरश्च भवति। तथैव अमलायोगसम्वन्धे [८]पराशर: वर्णयति।

"लग्नाद्वा चन्द्रलग्नाद्वा दशमे शुभसंयुते।
योगोऽयममला नाम कीर्त्तिराचन्द्रतारकी।।"

लग्नात् अथवा चन्द्रमस: दशमभावे चेत् वलवान् शुभग्रह: तिष्ठेत्, तर्हि तत् अमलायोग उच्यते। अमलायोगयुक्तमनुष्य: दाता, लोकप्रिय:, परोपकारी, धर्मात्मा गुणी च भवति।
[९]स्त्रीजातकसम्वन्धे आचार्यवराहमिहिर: स्वप्रणीतवृहज्जातकग्रन्थे वहुविषयान् प्रतिपादितवान्। तथा हि-

"कन्यैवाशुभवीक्षितेऽर्कतनये द्युने जरां गच्छति"। अस्य तात्पर्यं यदि लग्नात् उत चन्द्रमस: सप्तमभावे कोऽपि ग्रह: न तिष्ठेत्, सप्तमभावं कोऽपि शुभग्रह: न पश्येत्, पुन: सप्तमभाव: केनापि शुभग्रहेण सार्धं युक्त: न स्यात्, तर्हि तादृशस्त्रिय: निन्दनीया: पतिश्च निन्दनीय:, स: कापुरुष: नाम क्लीवत्वं गच्छति। यदि सप्तमभावे सुर्यस्तिष्ठेत् तर्हि सा स्त्री पतिपरित्यक्ता अथवा पत्युपेक्षिता भविष्यति। तत्र [१०]वृहज्जातके स्त्रीणामष्टमभावसम्वन्धे प्रोक्तम्।

"क्रुरेऽष्टमे विधवता निधनेश्वरोंऽशे।
यस्य स्थितो वयसि तस्य समे प्रदिप्टा।।"

अत्र जन्मलग्नात् चेत् अप्टमे क्रुरग्रह: तिष्टेत् तर्हि स्त्री वैधव्यमापद्येत। वैधव्यकाल: निर्णयार्थमष्टमेश: यस्य ग्रहस्य नवांशे तिष्ठति तस्य ग्रहस्य दशाभुक्तौ वैधव्यं जायते। एवञ्च यदि अष्टमे क्रुरग्रहस्तथा द्वितीये शुभग्रह: स्थात् तर्हि पत्यु: पूर्वात् स्त्रिया: मरणं निश्चीयते। अनया रीत्या पुरुषजातकवत् स्त्रीणामपि समुपन्यस्ता: सन्ति।
जैमिनिमुनिना जन्मकुण्डली तथा नवांशकुण्डल्याधारेण ग्रथितं सूत्रजालमुपजीव्य कारकांशलग्नात् यानि फलानि प्रकटीकृतानि तेषामाधारेणापि मया शोधनिवन्धेऽस्मिन् आर्थिकसमृद्धि-दाम्पत्यजीवन-कर्म-व्यवसाय-सुख-विद्या-स्वभाव-तथा-राजयोगप्रभृतिविषया: मया अत्र समासेन वर्णिता: सन्ति।

[११]वि.भि. रमणमहोदयेन ग्रहनिष्ठयोगानां त्रैविध्यं वर्णितं यथा:

A Yoga is formed by more than one planet. The nature of the planet is of three types. That benefic, malefic and neutral. According to the natural classification benefics are Jupiter, Venus, well associated mercury and waxing moon and malefics are the sun, mars, Saturn, evil associated mercury and wanning moon."

तत्र सूर्यादारभ्यशनिपर्यन्तसप्तग्रहास्तथाराहुमाहत्य अष्टग्रहाणां विचार: [१२]जैमिनिसूत्रग्रन्थे वर्णित:। यत्र कालसाम्यत्वेऽपि वलाधारेणात्मकारकग्रहाणां वर्णनं लक्ष्यते यथा- आत्माधिक: कालादिभिर्नभोग: सप्तानामष्टानां वा।

**उपसंहार**

वेदस्य ज्योतिष-व्याकरण-निरुक्त-शिक्षा-कल्प-छन्दशास्त्ररूपाणि षडङ्गानि संसारेऽस्मिन् सुप्रसिद्धानि सन्ति। कालविधानशास्त्रत्वात् नेत्ररूपत्वात् ज्योतिषस्योपयोग: प्रत्यक्षतयाऽपरिहार्य:। तत्र सिद्धान्त – संहिता – होरेति सुप्रथित स्कन्धत्रयाणामाधारभूतत्वात् ग्रहनक्षत्रादि- स्थितिज्ञापकत्वाच्च ज्योतिषशास्त्रसिद्धान्त: सर्वश्रेष्ठ: सर्वमान्य इति। परंव्रह्मण अंशावतारत्वेन सृष्टिचक्रे ग्रहाणां नक्षत्राणाञ्च प्रभाव: प्रकामं परिलक्ष्यते। तत्र महर्षि-जैमिनिपराशरवराहमिहिरपृभृतिज्योतिर्विदां ज्योतिषशास्त्रेषु जन्मकुण्डल्यां

व्दादशभावेषु ग्रहसम्वन्धिदिक्-कालवलवर्गगुणस्वरुपषोडषवर्ग भावफलाध्याये विषया: सविशदं वणिता: विद्यन्ते। ग्रहनक्षत्रविचारनिष्ठज्योतिषशास्त्रं मनुष्याणां शुभाशुभभविष्यफलविमर्श: नितरां ज्योतिर्विदां सुरिवराणां युक्तिभि: महिमामण्डित:। तत्र सकलशास्त्रधर्ममर्मज्ञा: विद्वद्वरा: शास्त्रहृदया: सहृदया: पौन:पुन्येन ज्योतिषशास्त्रविनिर्दिष्टयोगानां फलाफलं यथाप्रामाणिककृतिषु समुद्घाटितवन्त:, ते सर्वदा महनीया: वन्दनीयाश्च।

**पादटीका**

१. लघु.पा. एवं म.पा., पृ.- VI, व्याख्या- पं. केदारदत्त जोशी।
२. भारतज्योतिषशास्त्रेतिहास:-पृ-११७
३. बृहत्संहिता श्लो-१, वराहमिहिर:
४. मनुस्मृति:-२/६
५. ल.पा.-श्लो-६
६. वृ.पा-हो-पृ-२४७
७. वृ.पा.हो-पृ-२६१
८. वृ.पा.हो-पृ-२६१
९. वृ.जा-३/४/६
१०. वृ.जा-पृ-३५०
११. Important Combinations, P.-3, B.V. Raman.
१२. जैमिनिसूत्रम्, पृ-१५, जैमिनिमुनि, व्या.- डॉ. सुरेशचन्द्र मिश्र